योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ६२

श्रीवसिष्ठ उवाच ।

धीरो विचारवान्साक्षादादावेव महाधिया ।

शास्त्रेण विदुषा शास्त्रं सुजनेन विचारयेत्।। १

सुजनेम वितृण्णेन विदुषा महता सह ।

प्रविचार्य महायोगात्पदमासाद्यते परम्। २

शास्त्रार्थसुजनासङ्गवैराग्याभ्याससत्कृतः ।

पुरुषस्त्वमिवाभाति निजविज्ञानभाजनम् ।। ३

त्वमुदारनिजाचारो धीरो गुणगणाकरः ।

अधितिष्ठसि निर्दुःखं वीतसर्गमनोमलः ।। ४

नूनमुत्सर्जिताभ्रेण शरद्व्योम्ना समो भवान् ।

भव भावनया मुक्तो युक्त उत्तमसंविदा ।। ५

चिन्तामुक्तकलावत्या मुक्तकल्पनया स्थितम् ।

मनो मुक्तविभागं च मुक्तमेव न संशयः ।। ६

तवोत्तमानुभावस्य त इदानीं नरा भुवि ।

चेष्टामनुसरिष्यन्ति रागद्वेषविहीनया ।। ७

बहिर्लोकोचिताचारा विहरिष्यन्ति वै जनाः ।

भवार्णवं तरिष्यन्ति धीमन्तः पोतकान्विताः ।। ८

तव तुल्यमतिर्यः स्यात्सुजनः समदर्शनः ।

योग्योऽसौ ज्ञानदृष्टीनां मयोक्तानां सुदृष्टिमान् ।। ९

यावद्देहं धिया तिष्ठ रागद्वेषविहीनया ।

बहिर्लोकोचिताचारस्त्वन्तस्त्यक्ताखिलैषणः।। १०

परां शान्तिमुपागच्छ यथान्ये गुणशालिनः ।

अविचार्यास्त एवेह गोमायुशिशुधर्मकाः ।। ११

ये स्वभावा महासत्या नृणां सात्त्विकजन्मनाम् ।

तान्भजन्पुरुषो याति पाश्चात्योदारजन्मताम् ।। १२

यानेव सेवते जन्तुरिह जातिगुणान्सदा ।

अथान्यजातिजातोऽपि जातिं भजति तां क्षणात् १३

प्राक्तनानखिलान्भावान्यान्ति कर्मवशं गताः ।

पौरुषेणावजीयन्ते धराधरमहाकुलाः ।। १४

धैर्येणाभ्युद्धरेद्बुद्धिं पङ्कान्मुग्धगवीमिव ।

तामसीं राजसीं चैव जातिमन्यामपि श्रितः ।। १५

स्वविवेकवशाद्यान्ति सन्तः सात्त्विकजातिताम् ।

अतश्चित्तमणौ स्वच्छे यद्राघव नियोज्यते ।। १६

तन्मयो विभवत्येवं तस्माद्भवति पौरुषम् ।

पौरुषेण प्रयत्नेनमहार्हगुणशालिनः ।। १७

मुमुक्षवो भवन्तीह पाश्चात्यशुभजातयः ।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा क्वचित् ।। १८

पौरुषेण प्रयत्नेन यन्नाप्नोति गुणान्वितः ।

ब्रह्मचर्येण धैर्येण वीर्यवैराग्यरंहसा ।

युक्त्या युक्तेन हि विना न प्राप्नोषि तदीहितम् ।। १९

हितं महासत्त्वतयात्मतत्त्वं

विधाय बुद्ध्या भव वीतशोकः ।

तव क्रमेणैव ततो जनोऽयं

मुक्तो भविष्यत्यथ वीतशोकः ।। २०

पाश्चात्यजन्मनि विवेकमहामहिम्ना

युक्ते त्वयि प्रसृतसर्वगुणाभिरामे ।

सत्त्वस्थकर्मणि पदं कुरु रामभद्र
मैषा करोतु भवसङ्गविमोहचिन्ता ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते द्वात्रिंशत्साहस्र्यां संहितायां मोक्षोपायेषु स्थितिप्रकरणे द्विषष्टितमः सर्गः ।। ६२ ।।